# भारतीय-विद्या-भवनम्, मुम्बई - ७

**( सरल - संस्कृत - परीक्षा - विभागः )**

# संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

**प्रथमं प्रश्नपत्रम् - First Paper**

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. कयोश्चिद् द्वयोः श्लोकयोः भावार्थं स्वभाषया लिखत ।** **१०**

(१) विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रतिपत्तये।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा।।

(२) मतिमान् शास्त्रवित्प्राज्ञः पण्डितश्चासि राघव।
त्यजेमां प्राकृतां बुद्धिं कृतात्मेवात्मदूषणीम्।।

(३) कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः।।

**प्र.२. अधोलिखितवाक्येषु केषाञ्चित् पञ्चानामुत्तरं संस्कृतभाषया लिखत ।** **५**

(१) भगवान् शङ्करस्यावासस्थलं कुत्र आसीत्? (२) भारतवर्षस्य मूर्ध्नि मुकुट इव कः शोभते? (३) केन बहूनि मिष्ठान्नानि पक्वान्नानि च प्रसाध्यन्ते? (४) धर्मात्मा रामः सीतां सान्त्वयितुं किम् उवाच? (५) का संस्कृतिः विश्वेऽस्मिन् पुनः शान्तिं स्थापयितुं समर्था?
(६) आहिमालयात् समुद्रं यावत् का भारतीयानाम् उपकारं विदधाति?

**प्र.३. (क) अधोलिखितेषु पञ्चानां वाक्यानां स्वभाषयाऽनुवादं कुरुत ।** **५**

(१) नगेऽस्मिन् निबिडानि अरण्यानि सन्ति यत्र हि हिंस्राः पशवः दिवापि इतस्ततः अटन्ति।
(२) पुरा भगवता श्रीकृष्णेन गोव्रजं रक्षयित्वा सर्वेषां कृते उदाहरणम् उपस्थापितम्।
(३) नारिकेलस्य काष्ठमिन्धनाय, पत्राणि व्यजनाय, त्वक् रज्जुकरणाय, कपालं पानपात्राय, पयःपानाय,गर्भश्च भक्षणाय भवति। (४) सर्वमजानती वैदेही यौवराज्याभिषेचनम् एव प्रतीक्षमाणा स्वनिलये तस्थौ। (५) ब्रह्मपुत्र-सिन्धु-यमुना-प्रभृतयः नद्यः अपि हिमालयादेव प्रभवन्ति।

**(ख) अधोलिखितेषु वाक्येषु अशुद्धि-संशोधनं कुरुत।** ५

१) हिमालयस्य शिखराणि हिमाच्छादितानि भवति। (२) पुरा गोधनं जनानां मुख्यं धनं अस्ति। (३) गृहे विपुला: मूषक: सन्ति। (४) विद्या मातेव रक्षन्ति। (५) सैनिक: युद्धक्षेत्रे युद्धं कुर्वन्ति।

**प्र.४. एतासु लोकोक्तिषु कासाञ्चित् पञ्चानां स्वभाषया भावार्थं लिखत ।** ५

(१) अवश्यंभाविनो भावा भवन्ति महतामपि। (२) अतिप्रवृद्धा शाल्मली वारणस्तम्भो न भवति। (३) अस्य पापोदरस्यार्थे किमनाटि न नाटकम् । (४) अयमपर: क्षते क्षारावसेक:। (५) अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम्। (६) असहायं पथि न गच्छेत्।

**प्र.५. (क) अधोलिखितेषु केषाञ्चित् पञ्चानां सविग्रहं समासनामानि लिखत ।** ५

(१) राजपुरुष:। (२) अशक्त:। (३) नराधम:।
(४) नीलाम्बर:। (५) हरिहरगुरव:। (६) द्वित्रा:।

**(ख) ''सर्व (स्त्रीलिङ्गे)'' अथवा ''वाच् ''(स्त्रीलिङ्गे) शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत।** ५

**प्र.६. अधोलिखितेषु केषाञ्चित् पञ्चानां शब्दानामर्थान् लिखत ।** ५

(१) नगाधिराज:। (२) क्षयमायाति। (३) वितनोति।
(४) अनादृत्य। (५) अवनि:। (६) सांस्कृतिकी।

**प्र.७. निम्नलिखितवाक्येषु केषाञ्चित् पञ्चानां संस्कृतेऽनुवादं कुरुत ।** ५

(१) असत्य भाषण मत करो। (२) मैं निर्बल की रक्षा करता हूँ। (३) वह आङ्गन में पानी छिड़कता है। (४) कौन सी बालिका सबमें श्रेष्ठ है? (५) मीठी वाणी का बड़ा महत्त्व है। (६) इस लोक में सुख कौन प्राप्त करता है?

(1) Don't talk lie. (2) I protect the weak. (3) He sprinkles water in the courtyard.(4) Who is the best girl among all.? (5) Sweet speech has great importance. (6) Who gets happiness in this world?

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

### द्वितीयं प्रश्नपत्रम् - Second Paper

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. अधस्तनेषु द्वयोः श्लोकयोः भावार्थं स्वोत्तरभाषया लिखत ।** **१०**

(१) ऋतवः सागरा द्विपा वेदा लोका दिशश्च ते ।
मङ्गलानि महाबाहो दिशन्तु तव सर्वदा ।।

(२) येन येन च गच्छन्ति राक्षसा भयकर्शिताः।
तेन तेन स्म पश्यन्ति राममेवाग्रतः स्थिरम् ।।

(३) लतासु पुष्पाणि वनेषु वृक्षान् फलानि वृक्षेषु फलेषु सारम् ।
पुष्पेषु रूपं गन्धं च शोभनं ससर्ज क्षेमाय नृणां विधाता।।

**प्र.२. अधस्तनस्य गद्यखण्डस्य स्वभाषया अर्थं लिखत ।** **१०**

ग्राम्याः क्षेत्रेषु कठिनं श्रमं कुर्वन्ति। ते सरलस्वभावाः नित्यं प्रसन्नचित्ताश्च भवन्ति। तेषां वेषः,भोजनं, पानं च साधारणम्। ते भक्तं रोटिकां सूपं शाकानि च भुञ्जते। ते गाः पालयन्ति । ते दुग्धं,दधि, नवनीतं, तक्रं, घृतं चाश्नन्ति। ते स्वस्थाः परिपुष्टाः बलवन्तश्च भवन्ति। ग्रामाः प्रायेण नदीनां तटेषु भवन्ति। सर्वेभ्यः ग्रामेभ्यः बहिः कूपाः भवन्ति। तेषां जलं शीतलं मधुरं च भवति। बहुधा कूपजलं पिबन्ति ग्रामीणाः। ते नदीषु स्नाति,पशून् स्नापयन्ति,तासां जलेन क्षेत्राणि च सिञ्चन्ति।

अथवा

संस्कृतभाषाम् उपजीव्य भवन्तो भारतीयाः समुज्वलां संस्कृतिं निर्मितवन्तः, या वस्तुतः भवतां गौरवाय कल्पते। भवतां भगवद्गीता अज्ञातकालतः मनुष्याणां मार्गप्रदर्शनं शान्तिप्रदानं च कुरुते। इयं हि नवभारतस्य राष्ट्रपितुः महात्मागान्धिनः सततसहायिका आसीत्। अथ चेयं सुदूरे भविष्यत्यपि साधकानां मार्गदर्शनं करिष्यति। संस्कृतस्य साम्राज्यं भारते एव न सीमितं,किन्तु हिमालयपर्वतमालामुल्लंघ्य महावनानि अन्तः प्रविश्य वङ्गसागरं च अतिक्रम्य प्रसृतम्। भारतीय विचारधारा अस्यामेव काशीनगर्यां भगवता बुद्धेन प्रभाविता प्राच्यस्य एशियाद्वीपस्य अधिकतरेषु भागेषु ब्रह्मदेश-श्यामदेश-जापान-कोरिया-मंगोलिया-तिब्बत,पारसीकप्रभृतिदेशेषु रूसभूमिं यावत् अभिव्याप्ता।

[P.T.O.]

**प्र.३. निम्नलिखितासु पञ्चानां लोकोक्तीनामर्थं स्वोत्तरभाषया लिखत । ५**

(१) अनुकूले विधौ सर्वं जगदेति कृपालुताम्। (२) अतिदर्पात् हता लङ्का। (३) अर्थमनर्थं भावय नित्यम्। (४) अङ्गीकृतं सुकृतिनः परिपालयन्ति। (५) अस्थानकृतोपकारो महानपचयः। (६) अल्पमपि छललब्धं बहुसत्यार्जितमपि प्रदूषयति।

**प्र.४. अधोलिखितपदेषु पञ्चानामर्थं विलिख्य वाक्येषु प्रयोगं कुरुत । ५**

(१) लोकोत्तराणाम् । (२) परोपदेशे । (३) शशिनिभाननः।
(४) पिपीलिकाम् । (५) वरप्रदानम् । (६) शोकदुःखसमन्विता।

**प्र.५. 'चन्द्रमस्' अथवा 'उपानह्' शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत। ५**

**प्र.६. अधोलिखितेषु पञ्चानां शब्दानामर्थं विलिख्य तेषां प्रत्ययान् निर्दिशत । ५**

(१) धावितुम्। (२) वैनतेयः। (३) प्राज्ञः। (४) दाक्षिणात्यः (५) वक्तुम्। (६) कर्तव्यम्।

**प्र.७. अधोलिखितेषु पञ्चानां पदानां सन्धिविच्छेदं कुरुत । ५**

(१) रामस्सदा। (२) प्रदीप्तेव। (३) पावकः।
(४) कश्चिच्छन्नम्। (५) मृत्योरिव । (६) पठाम्यहम्।

**प्र.८. अधोलिखितवाक्येषु पञ्चानां संस्कृतभाषायामनुवादं कुरुत । ५**

(१) असत्य भाषण मत करो। (२) तुम रात का भोजन कब करते हो? (३) उसने सफल कार्य किया। (४) गाँव प्रायः नदी के किनारे होते हैं। (५) वह रात-दिन चिन्तित रहता है। (६) रास्ते पर नहीं खेलना चाहिए।

(1) Do not tell lies. (2) When do you take your dinner? (3) He did a successful work. (4) The villages are often situated on the banks of river. (5) He is worried day and night. (6) One should not play on the road.

❑ ❑ ❑

A07
S-2025

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

## संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

### तृतीयं प्रश्नपत्रम् - Third Paper

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. अधस्तनेषु द्वयोः स्वोत्तरभाषया परिचयो देयः ।** **१०**

(१) उपनिषदः। (२) रामायणम्। (३) ब्राह्मणग्रन्थाः।

**प्र.२. निम्नलिखितासु पञ्चानां सूक्तीनामर्थं स्वोत्तरभाषया लिखत ।** **५**

(१) धेनोः शीलज्ञः क्षीरं भुङ्क्ते। (२) धर्मक्षयकरः क्रोधः। (३) दरिद्रता धीरतया विराजते। (४) दुष्प्रयत्नेषु साफल्यं दुष्प्रवृत्तिं प्रवर्धयेत्। (५) द्विगुणं शीघ्रदानं स्यात्। (६) दुर्मेधसः छिन्नसंशयाः कर्तुमशक्याः।

**प्र.३. अधोलिखितेषु केषाञ्चित् पञ्चानां वाक्यानां शुद्धिः विधेया ।** **५**

(१) भूपत्युः प्रासादे गच्छ। (२) तिस्रः सुन्दरा युवतयः। (३) सर्वे जनाः खादति। (४) त्वया कुत्र गम्यसे ? (५) बालकाः चन्द्रमसं याचते। (६) तव मित्रं कः सन्ति ?

**प्र.४. अधस्तनस्य गद्यखण्डस्य स्वभाषया अर्थं लिखत।** **५**

कृषिवलस्य जाया खाद्यं गृहीत्वा क्षेत्रं गत्वा कृषिवलायार्पयति। क्षेत्राद् घासमानीय पशुभ्यः खादयति। प्रातः सायं च गाः महिषीश्च दोग्धि। दुग्धं घृतं च विक्रीणाति। कृषकपुत्रा अपि कृषिकर्मणि तस्य सहायतामाचरन्ति। एवं प्रकारेण सकलोऽपि कृषकपरिवाराः उद्योगरतो भवन्ति।

**प्र.५. ग्रीष्मावकाशे ग्रामम् आगनाय मित्रं प्रति पत्रं संस्कृतभाषया लिखत ।** **५**

**प्र.६. निम्नलिखितेषु पञ्चानां छन्दसां लक्षणमुदाहरणञ्च लिखत।** **१०**

(१) शालिनी। (२) दोधकम्। (३) भुजङ्गप्रयातम् ।
(४) मन्दाकिनी। (५) मालती । (६) मालिनी।

**प्र.७. एकमाश्रित्य स्वभाषया निबन्धं लिखत ।** **१०**

१) अस्माकं भारतवर्षः। (२) संस्कृतभाषायाः महत्त्वम्।

❑ ❑ ❑